श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ कटाक्षस्तबकः पञ्चमः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ कटाक्षस्तबकः पञ्चमः ॥

लक्ष्मीवदन लावण्य सुधोदधि कृतोदयः।
कल्पवृक्षः कटाक्षात्मा काङ्क्षितानि करोतु नः॥ **5.1** ॥

क्षमाकुमारि क्षणमीक्षणं त्वं
    यदृच्छया न्यस्यसि यस्य जन्तौ।
स ईक्षणानां त्रयमष्टकं वा
    सहस्रकं वा सहसा दधाति॥ **5.2** ॥

अम्ब स्तोकालोकसुधाशीकरलेशैः
    अङ्गं जन्तोरार्द्रयसे यस्य स एषः।
हस्तात् स्वीयाद्वारणमस्ताच्च गलद्भिः
    दानाम्भोभिः पङ्किलगेहाङ्कणभूः स्यात्॥ **5.3** ॥

त्वद्वीक्षणामृतकणोऽपि न येषु तेषां
    सद्मानि जीर्णशिथिलच्छदिराप्तिरक्तैः।
अभ्रच्युतैरुदकबिन्दुभिरश्रुमिश्रैः
    जम्बालितानि जगदम्ब चिरं भवन्ति॥ **5.4** ॥

कनकशिबिकारूढाः प्रौढाधिराज्यपदे स्थिताः
    कतिचिदतुलं मन्या धन्याश्चरन्ति यदिन्दिरे।
यदपि च वहन्त्येनां दीनाः परे फलमम्ब तत्
    द्वयमपि तव स्तोकालोकान्वयव्यतिरेकयोः॥ **5.5** ॥

जडं मामप्यार्तं जननि शिशिरापाङ्गविसरैः
    कृपापूरस्मेरैः क्षणमिह कृतार्थी कुरु मुदा।
ततः को वा दोषस्तव भवति दैत्यारिदयिते
    मरौ वा मेरौ वा भगवति समं वर्षति घनः॥ **5.6** ॥

द्वारि द्वारि दुरीशकिङ्करकृतैरातङ्कदैर्हुङ्कृतैः
    अप्युच्चैरतिमात्रवेत्रपरुषाघातैरनुच्चाटितः।
दुर्दारिद्र्यदशापिशाचनिचयो दूरात्समुत्सार्यते
    देवि त्वत्करुणाकटाक्षतटिनी स्नानार्जवेनाधुना॥ **5.7** ॥

शुचौ वंशे जन्म श्रुतिनयमतिर्मातरतुला
    विकम्पा संपत्तिर्विशदमविगीता च कविता।
प्रपत्तिर्दैत्यारौ हितपरमपत्यं शुभयशो
    विवर्त्ताः सप्तामी ध्रुवमसदृशां तावकदृशाम्॥ **5.8** ॥

अलमलमनुसृत्य स्वामिनि ज्ञानहीनान्
    अकलितबहुमानानन्वहं किंपचानान्।
शरणमुपगतं मां चारु कारुण्यतुङ्गैः
    स्नपय जननि संपन्नृत्तरङ्गैरपाङ्गैः॥ **5.9** ॥

कृती वसुमतीपतीन् कृतचटुस्तवः सेवतां
    दिशः स्फुटमटाट्यतां दिशतु धातुवादे दृशम्।
जपत्वपि मनून् बहून् जलनिधेः सुते यस्तु ते
    दृशामिह दयास्पृशामविषयो दरिद्राति सः॥ **5.10** ॥

कृपणदशापिशाचगणमोचनवेत्रलताः
    मधुरिपुभक्तिवल्लि परिवृद्धिसुधाम्बुधराः।
हृदयतमोविमोक्षहिमधामकराः कमले
    भगवति नः पुनन्तु भवदीयकटाक्षलवाः॥ **5.11** ॥

उदीता दुग्धाब्धेः कुवलयपरीतापशमनी
पदे विष्णोर्भान्ती रजनिचरचक्रव्यसनदा।
दिशन्ती सार्वज्ञं भजति शिरसा क्वापि कमले
शुभालोकैः शोकं हरतु शशिलेखेव भवती॥ **5.12**॥

दूराजावसथाभिधान निरयद्वाराग्रजाग्रन्नर -
क्रूरालापशराहतिव्यतिकरं दूरान्निराकुर्वतीः।
पारावारसुते तरङ्गय मयि स्मेराम्बुजस्पर्धिनीः
घोरापारसमस्तदुष्कृत परीहाराय धीरा दृशः॥ **5.13**॥

अघटितघटनापटीयसी ते
हरिगृहिणि प्रकटा कटाक्षरेखा।
स्थिरवसुमवनीपकं विधत्ते
जननि वनीपकमेव हन्त जन्तुम्॥ **5.14**॥

नयने फणीन्द्रशयनेष्टनायिके
यदि नादधासि सुदिनाब्जशोभने।
बलभेदनोऽपि न लभेत संपदं
मरुतामयेत मरुतामपि स्थली॥ **5.15**॥

करुणारसेन वरुणालयात्मजे
म्रदिमानमेत्य यदि मामवेक्षसे।
मलिनात्मनापि कलिना क्रियेत किं
मम किं करोतु यमकिङ्करोऽपि वा॥ **5.16**॥

मामपाङ्गलहरी गरीयसी
तावकी स्पृशतु देवकीस्नुषे।
अन्तकस्य तु रुषा कषायिता
मा पतन्तु मयि दृष्टिवृष्टयः॥ **5.17**॥

बन्धुरगुणे कृपणबन्धुमनपायं
सिन्धुतनये तव कटाक्षमकरन्दम्।
इन्दुकरवृन्दजडचन्दनमहीभृत्
कन्दरमरुच्छिशिरसुन्दरमुपासे ॥ **5.18** ॥

आर्तिं लुम्पत्वम्ब तवापाङ्गसुधात्मा
गङ्गा सैषा चित्रगतिर्वर्जितभङ्गा।
नेत्री शोषं प्रत्युत पद्मे भवमेव
प्राज्ञानां या भासितरूपं च विधत्ते ॥ **5.19** ॥

उच्चकोरकनवाभ्युदयं ते
वीक्षितं मनुमहे मकरन्दम्।
यत्र तल्लगति षट्पदमन्त्रः
तत्र भाति शतपत्रगृहे यत् ॥ **5.20** ॥

यक्षश्रीजननचणैस्तवावलोकैः
लक्ष्मि श्रीक्षयपिशुना निरस्यमाना।
नालीकासनलिपिरप्यलीकलीना
नालीका भवति नृणां प्रतीपगत्या ॥ **5.21** ॥

दुग्धाब्धिकन्ये त्वदपाङ्गभृत्या
वित्ताधिपत्यादिपदाभिषिक्ताः।
हृत्तापयुक्तास्तव देव्यभक्ता
मर्त्या जगत्यां विलपन्ति रिक्ताः ॥ **5.22** ॥

वीक्षितानि तव वारिधिकन्ये
यत्र पालितजगन्ति लगन्ति।
चित्रमत्र स परत्र च देही
देहिशब्दमपहाय चकास्ति ॥ **5.23** ॥

तव देवि पटुर्नटः कटाक्षो
    गुणवत्तालसदुच्छ्रयः स नूनम्।
ननु नर्तयते सरस्वतीं यः
    सततं संश्रितमञ्जुलास्यरङ्गे ॥ **5.24** ॥

भावत्कैर्भगवति कज्जलानुविद्धैः
    कृष्णो यैर्भवति विधुः कटाक्षपूरैः।
तल्लेशैरधिकतमश्रियां निदानैः
    मालिन्यं हरसि विचित्रमान्तरं नः ॥ **5.25** ॥

विकस्वरामोदभरं वितन्वती
    पुरोवसन्तं प्रथितागमाञ्चिता।
कटाक्षवल्ली तव माधवप्रिये
    प्रसौत्यनन्तं सुमिताप्यसौ फलम् ॥ **5.26** ॥

न विप्रयोगि व्यसनाय कल्पते
    न मार्गणानां सहते च पञ्चताम्।
भवं जवात् प्रत्युत दन्दहीत्ययं
    जयत्यपाङ्गस्तव चित्रमिन्दिरे ॥ **5.27** ॥

विकचकमलशोभाविभ्रमोद्भूतिसीमा
    विधुमिह सदुपास्यं तन्वती सुप्रसन्नम्।
शरदिव तव वीक्षा शार्ङ्गिणः प्राणकान्ते
    शमयतु किल मेघाटोपमुज्जृम्भितापम् ॥ **5.28** ॥

नित्यामेव विभूतिमम्ब ददतो निर्व्याजबन्धोर्भवत् -
    दिव्यापाङ्गलवस्य वर्णनविधौ को लब्धवर्णो भुवि।
जुष्टो दृष्टिभिरष्टभिश्च तिसृभिः प्रायः सहस्रेण वा
    देवि द्वादशभिश्च दैवतगणो यस्मै चिरं तिष्ठते ॥ **5.29** ॥

तत्तादृक्षकटाक्षकङ्कटधरः श्रीवेङ्कटाद्रीशितुः
प्राणप्रेयसि भूयसीं प्रभजते शौर्याभिमुख्यश्रुतिम्।
सत्कीर्त्या सहसामरोत्तमजयं प्राप्तस्तवोपाश्रितो
वाग्बाणैर्न विहन्यते क्षितिभुजां निर्जित्य नित्यद्विषः॥ **5.30** ॥

यावद्भावत्कवीक्षा विशति तनुभृतामिन्दिरे मन्दिरेषु
व्यक्तं नृत्तं विधत्ते धनपतिविभवादुत्तरा वित्तराजिः।
द्वारे तारेशगौरास्तुरगपरिबृढा बन्धुराः सिन्धुरा वा
गर्वात् घुष्यन्त्यखर्वाभ्युदयमधिमुखं राजते राजतेजः॥ **5.31** ॥

धन्यः कश्चिज्जगति विषयस्तावकालोकितानाम्
अत्रामुत्राप्यखिलजननि प्राप्य गोत्राधिकृत्त्वम्।
सत्सन्तानप्रभवसुमनः सेवयाऽऽमोदशाली
जैत्रस्थानं किमपि भजति श्रीमदुच्चामरं च॥ **5.32** ॥

शय्योत्थायं जननि धनिनां वासमासायमित्थं
गत्वा गत्वाऽप्यनुदिनमनुच्छिन्नतृष्णोद्गमोऽहम्।
हृद्यापाङ्गामिव भवदवप्लोषशान्त्यै रमे त्वां
हृद्यापाङ्गां मधुरिपुवशीकारविद्ये प्रपद्ये॥ **5.33** ॥

वितन्वन्त्यामिष्टं विविधमचिरादीक्षणलवैः
भवत्यां जाग्रत्यां भगवति नरान् सेवितुमनाः।
क्षरन्तीमभ्यर्णे कमलसुरभिस्वादुसलिलां
स्रवन्तीमुल्लङ्घ्य श्रयति मृगतृष्णामतितृषा॥ **5.34** ॥

अजीर्यदघनाशनं दृढगदाकरं देवि यत्
पुराणमपि पूरुषं पुनरलङ्घनं पुष्यति।
तदेतदिह पातु नस्तव कटाक्षदिव्यौषधं
फणीन्द्रशयजीविके भवविपन्मयादामयात्॥ **5.35** ॥

दुर्लङ्घ संसृतिदुरर्णवकर्णधाराः
संपद्द्रुधूसतत नर्तनसूत्रधाराः।
अज्ञानकाननविदारकुठारधाराः
पद्मे जयन्ति भवदीयकटाक्षधाराः ॥ **5.36** ॥

स्वादुशीतलदयारसपूर्णं
सेवितं द्विजवरैरमृतोत्कैः।
देवि तावककटाक्षतटाकं
विश्वतापविगमाय विगाहे ॥ **5.37** ॥

करुणया कलशोदधिकन्यके
जडतमेष्ववलोकमघापहम्।
वितनुषे सकृदेष पुनस्तनो -
त्यनवलोकमधन्यदुरासदम् ॥ **5.38** ॥

देवि कटाक्षलवस्तव रिक्ते
संपदमाधिपदेऽपि निधत्ते।
सिन्धुकुमारि तथाप्यतमस्के
सिध्यति तत्र समाधिरदृप्ते ॥ **5.39** ॥

प्रागेव स्यात् प्रार्थितार्थस्य सिद्धिः
पश्चादम्ब त्वत्कटाक्षोपलम्भः।
दृष्टान्तो नस्तत्र ते दृष्टिपातात्
प्रागम्भोधिं लङ्घयन् पावमानिः ॥ **5.40** ॥

वक्षोरक्षे शार्ङ्गिणः स्थूललक्षे
तत्तादृक्षे जाग्रति त्वत्कटाक्षे।
सूनश्रीभिः सान्द्रगन्धे परोक्षे
कुर्यादास्थामल्पधीः कल्पवृक्षे ॥ **5.41** ॥

रचयति तव वीक्षा नूनमज्ञेऽपि रक्षां
    दुरितचरितभेदी देशिको मन्त्रवादी।
तदिह गलितमोहो द्रागयं पद्मगेहे
    विषयरुचिपिशाची विक्रियाभिर्व्यमोचि ॥ **5.42** ॥

जगदम्ब तवापाङ्गो
    जलजातशरः प्रपुष्टमधुकालः।
कमले कथय कथं वा
    करोत्यसौ सर्वमङ्गलेनाप्तिम् ॥ **5.43** ॥

तिष्ठन्त्वष्टम एव भूसुतशनिप्रष्ठाश्च दुष्टा ग्रहाः
    फाले कामपि लेलिखीतु जगतः स्रष्टापि कष्टां दशाम्।
ते किं कुर्युरपाङ्गतो मयि सकृद्देवि त्वयाऽङ्गीकृते
    नीहारो न करस्थमम्बरमणेर्लीलाम्बुजं बाधते ॥ **5.44** ॥

विजयापजयौ रमे भवेतां
    त्वदपाङ्गान्वयतद्विपर्ययाभ्याम्।
अजयत्तव वीक्षया हनूमान्
    अधिलङ्कं विकटाक्षराक्षसौघम् ॥ **5.45** ॥

प्रतिघोष्णमधीशितुर्न पद्मे
    भवदीक्षाविषयं प्रवेष्टुमीष्टे।
त्वदपाङ्गसुधार्द्रितस्तुषारी -
    भवदग्निर्हनुमानिह प्रमाणम् ॥ **5.46** ॥

कटाक्षप्रत्यूषे तव मिषति कंसारिदयिते
    तमः शाम्यत्यन्तर्गतमपि च सूर्याकलनतः।
स्वयं दोषोन्मेषो विरमति पुनस्सारसवन -
    श्रियः सम्पद्यन्ते दिवि च भविता भासनमपि ॥ **5.47** ॥

सुरभिस्तनुते तवावलोकः
सुमनः संपदमम्ब भूमिजानाम्।
अविपल्लवतां विधाय पुष्णा -
त्यपि चामोदमदीप्तिकाननानाम्॥ **5.48** ॥

कमले गभीरकरुणाजलधे
त्वयि मन्दरक्षणविकासिहृदि।
कलितोदया मृदुकटाक्षसुधा
प्रथयत्यसौ सुमनसां प्रमदम्॥ **5.49** ॥

प्रतिघानलं भुजगशैलपतेः
प्रशमं नयन्त्यतितरां शिशिरा।
कमलालये तव कटाक्षझरी
विधुनोतु मे वृजिनतापभरम्॥ **5.50** ॥

दृशो लेशं देयास्त्रियुगसखि देयं कियदिदं
महोदारायास्ते मम तु सुमहानेष विभवः।
कणानत्र द्वित्रान् गणयति न वारां जलधरः
प्रपद्यन्ते शुक्तौ परिणतिममी मौक्तिकतया॥ **5.51** ॥

बिलेशयकुलेशभूधरपतिप्रिये त्वद्दया
तरङ्गितमपाङ्गितं धृतवतश्चिरं दृश्यते।
विकस्वरपिकस्वर व्यतिकरस्फुरन्निष्कुटं
नटद्युवतिनूपुर क्वणितसुन्दरं मन्दिरम्॥ **5.52** ॥

नारायणप्रणयिनि त्वमपाङ्गदुग्ध -
धाराभिराभिरभिषिञ्च दयाम्बुधे माम्।
स्मेरानवद्यनिरुपाख्यसुखं यतो मे
स्वाराज्यभाग्यमपि सेत्स्यति शाश्वतं तत्॥ **5.53** ॥

भो भूपभूमौ भ्रम भीमपाप -
    भूमेति मे मूर्ध्नि लिपिं विधातुः।
पवर्गगर्भां परिमृज्य पद्मे
    लिखस्यपाङ्गैरपवर्गगर्भाम्॥ 5.54॥

यं त्वं देवि निरीक्षसे यदुपतेः कान्ते दृशा तादृशा
    तत्र स्तोत्रगिरश्चरन्ति विदुषां तत्रैव चित्रा गुणाः।
तेनैव व्यपदेशमृच्छति कुलं तस्मै मतिस्तिष्ठते
    द्रष्टा पृष्ठमरेस्स एव न पुनर्धन्यं तदन्यं विदुः॥ 5.55॥

अपारसंसारतपातपार्ति -
    व्यपायदच्छायमपास्तदोषम्।
कृपामरन्दैः शिशिरं रमे त्व -
    दपाङ्गकल्पद्रुमुपाश्रयामः॥ 5.56॥

भावत्कमार्तिशमनं विरजातरङ्गं
    पश्याम्यपाङ्गमखिलाम्ब यदाप्लुताङ्गः।
पीताम्बराकलितदीप्ति पदं परार्ध्यं
    मुक्तादिभूषितमुपेत्य मुदं दधाति॥ 5.57॥

दुर्वर्णमर्णवसुते नमतां ललाटे
    लोकाम्ब लुम्पति कटाक्षझरस्त्वदीयः।
ते राजताभ्युदयिनः पुनरुल्लसन्ती -
    त्येतत् करोति हृदि विस्मयमस्मदीये॥ 5.58॥

देवि दुर्गतमरौ तव वीक्षा
    कालिका दिशति काञ्चनवृष्टिम्।
तस्य सिध्यति सुकीर्तिरुदञ्च -
    द्धीरसस्यविभवश्च ततः स्यात्॥ 5.59॥

वरुणालयसार्वभौमकन्ये
    करुणापाङ्गमधुव्रतस्त्वदीयः।
मधुनाशनमेत्य वृद्धिमृच्छन्
    अधुना नीरजसङ्गतिं विधत्ताम्॥ **5.60**॥

निद्राजुषां भवविषादमये निशीथे
    स्वापाङ्गमर्पयसि शोभनमौषधं नः।
चित्रं ततोऽपि जगदम्ब चिरं विनिद्रं
    वेत्स्यामहे विगतदुःखपदं प्रबोधम्॥ **5.61**॥

स्वालोकं शिशिरं चिराय नयसे यं जायमानं जनं
    संपश्येन्मधुकाल एव सुमनः सत्त्वावहस्तं ततः।
पाथोजायतने रजांसि जनयन् वेधोदृगूष्मागमो
    रौद्रालोक घनागमश्च तमसां कर्ता न तत्रास्पदी॥ **5.62**॥

प्रायः कञ्चिददृष्टवन्तमवनौ पद्मे दृशा स्वीयया
    संयोज्य प्रसभं क्षणेन तनुषे जन्तुं सहस्रेक्षणम्।
आधित्सस्यसदृक्पदे त्रिदशनेत्राकारभाजं तम -
    प्येणाङ्कस्वसरीदृशं घटयितुं द्रागीशिषे दुर्घटम्॥ **5.63**॥

मुखरुचिसरित्तरङ्गाः स्मितसितशतपत्रलोलकलभृङ्गाः।
संपन्नर्तनरङ्गा जयन्ति जगदम्ब तावकापाङ्गाः॥ **5.64**॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे कटाक्षस्तबकः पञ्चमः॥